प्रथमदण्डरूपा । तस्यां शिवलिङ्गोद्भवो यथा,
"माघकृष्णचतुर्द्दश्यामादिदेवो महानिशि ।
शिवलिङ्गतयोद्भूतः कोटिसूर्य्यसमप्रभः ॥"
अत्र ।
"महानिशा द्वे घटिके रात्रेर्मध्यमयामयोः ॥"
इति देवलोक्ता महानिशा ॥
घटिका दण्डरूपा । इति तिथ्यादितत्त्वम् ॥
तान्त्रिकमहानिशा यथा, तन्त्रसारे ।
"गते तु प्रथमे यामे तृतीयप्रहरावधि ।
महानिशायां जप्तव्यं रात्रिशेषे जपेन्न तु ॥"
अपि च ।
"निशा तु परमेशानि ! सूर्य्ये चास्तमुपागते ।
प्रहरे च गते रात्रौ घटिके द्वे परे च ये ।
महानिशा समाख्याता ततश्चातिमहानिशा ॥
अर्द्धरात्रे गते देवि ! पशुभावेन पूजयेत् ।
दशदण्डे तु या पूजा तत् सर्व्वमचयं भवेत् ॥
षष्ठक्रोशे महेशानि ! तत् सर्व्वमन्तोपमम् ।
सप्तमक्रोशके देवि ! सर्व्वं चौदोपमं भवेत् ॥
अष्टमक्रोशके देवि ! द्रवतुल्यं न संशयः ।
अतःपरं महेशानि ! विषतुल्यो न संशयः ॥
एतत् सर्व्वं महेशानि ! पशुभावे मयोदितम् ।
दिव्यवीरमते देवि ! तत्त्वज्ञानेन पूजयेत् ॥
पञ्चतत्त्वं समानीय यदि पूजापरो भवेत् ।
कालाकालं महेशानि ! विचारं तत्र वर्ज्जयेत् ॥
अर्द्धरात्रगते देवि ! कुलपूजा प्रकीर्त्तिता ।
भवेत्तत्कालरूपेण सर्व्वं पूजादिकञ्चरेत् ॥
अतिस्नेहेन देवेशि ! तव स्थाने प्रकाशितम् ।
पशोरग्रे कदाचिद्वै प्रकाशं नैव कारयेत् ॥"
इति गुप्तसाधनतन्त्रे ६ पटलः ॥

महानीचः, पुं, ( महानतिशयो नीचः । ) रजकः । इति शब्दमाला ॥ अतिशयहीनवंशश्च ॥

महानीलः, पुं, ( महान् नीलः नीलवर्णः । ) भृङ्गराजः । नागविशेषः । मणिविशेषः । इति मेदिनी । ले, १६१ ॥ ( यथा; शिशुपालवधे । १ । १६ ।
"महामहानीलशिलारुचः पुरो
निषेदिवान् कंसकृषः स विष्टरे ।"
"सिंहलस्याकराद्भूता महानीलास्तु ते स्मृताः ॥
इति भगवानगस्त्यः ।" इति तट्टीकायां मल्लिनाथः ॥) तस्य लक्षणं यथा,—
"यस्तु वर्णस्य भूयस्त्वात् क्षीरे शतगुणे स्थितः ।
नीलतां तनुयात् सर्व्वं महानीलः स उच्यते ॥"
इति गारुड़े ७२ अध्यायः ॥
( गुग्गुलुजातिभेदः । तद्यथा,—
"महिषाक्षो महानीलः कुमुदः पद्म इत्यपि ।
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्च जातयः ॥
महानीलस्तु विज्ञेयः स्वनामसमलक्षणः ।
महिषाक्षो महानीलो गजेन्द्राणां हिताबुभौ ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
सुमेरोर्दक्षिणपार्श्वस्थपर्व्वतविशेषः । यथा, मार्कण्डेये । ५५ । ४ ।

"शीतार्त्तश्चक्रमुञ्जश्च कुलीरोऽथ सुकङ्कवान् ।
मणिशैलोऽथ वृषवान् महानीलो भवाचलः ॥")

महानीला, स्त्री, ( महती चासौ नीला नीलवर्णा चेति ।) महाजम्बूः । इति राजनिर्घण्टः ॥ ( विशेषोऽस्य महाजम्बूशब्दे विज्ञेयः ॥ )

महानीली, स्त्री. ( नील + "नीलादोषधौ ।" ४ । १ । ४२ । इति वार्त्तिकोक्त्या ङीष् । ततः । महती चासौ नीली चेति ।) नीलापराजिता । वृहन्नीली । तत्पर्य्यायः । अमरा २ अनिनीलिका ३ तुत्था ४ श्रीफलिका ५ मेला ६ केशार्हा ७ भर्त्सपत्रिका ८ । अस्या गुणाः । गुणाढ्यत्वम् । रङ्गश्रेष्ठत्वम् । सुवर्णदातृत्वम् । नीलिकामपेक्ष्य सर्व्वकर्म्मसु सगुणत्वम् । इति राजनिर्घण्टः ॥

महानुभावः, त्रि, ( महाननुभावो माहात्म्यमस्य । ) महाशयः । यथा,—
"सुकृती पुण्यवान् धन्यो धर्म्मी च धर्म्मवानपि ।
महाशयो महेच्छः स्यान्महानुभाव इत्यपि ॥"
इति शब्दरत्नावली ॥
( महात्मा । यथा, शिशुपालवधे । २ । १७ ।
"गृहीतुमार्य्यान् परिचर्य्यया मुहु-
र्महानुभावा हि नितान्तमर्थिनः ॥")

महान्तः, पुं, ( महत् + प्रथमाबहुवचनरूपम् । ) नवधाभक्तियुक्तकृष्णभक्ताः । ते शिवशेषधर्म्मादयः । यथा,—
"शिवः शेषश्च धर्म्मश्च ब्रह्मा विष्णुर्महान् विराट् ।
सनत्कुमारः कपिलः सनकश्च सनन्दनः ॥
वोढुः पञ्चशिखो दक्षो नारदश्च सनातनः ।
भृगुर्म्मरीचिर्दुर्वासाः कश्यपः पुलहोऽङ्गिराः ॥
मेधसो लोमशः शुक्रो वशिष्ठः क्रतुरेव च ।
वृहस्पतिः कर्द्दमश्च शक्तिरत्रिः पराशरः ॥
मार्कण्डेयो बलिश्चैव प्रह्लादश्च गणेश्वरः ।
यमः सूर्य्यश्च वरुणो वायुश्चन्द्रो हुताशनः ॥
अकूपार उलूकश्च नाड़ीजङ्घश्च वायुजः ।
नरो नारायणः कूर्म्म इन्द्रद्युम्नो विभीषणः ॥
नवधाभक्तियुक्ताश्च कृष्णस्य परमात्मनः ।
एते महान्तो धर्म्मिष्ठा भक्तानां प्रवरास्तथा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६० अध्यायः ॥

महापञ्चमूलं, क्ली, ( पञ्चानां बिल्वादिमूलानां समाहारः । ततः महच्च तत् पञ्चमूलञ्चेति । ) वृहत् पञ्चमूलम् । तद्यथा,—
"बिल्वोऽग्निमन्थः श्योनाकः काश्मर्य्यः पाटला तथा ।
सर्व्वैस्तु मिलितैरेतैः स्यान्महापञ्चमूलकम् ॥"
इति राजनिर्घण्टः ॥
( यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये ।
"विनिर्गमार्थं वायोश्च स्वेदयेच्च मुहुर्मुहुः ।
क्षीरं महापञ्चमूलं क्षधिकां चाम्लवर्ज्जिताम् ॥")

महापञ्चविषं, क्ली, (पञ्चानां विषाणां समाहारः । ततो महच्च तत् पञ्चविषञ्चेति । ) वृहद्विषपञ्चकम् । तद्यथा,—

"शृङ्गी च कालकूटश्च मुस्तको वत्सनाभकः ।
शङ्खकर्णीति योगोऽयं महापञ्चविषाभिधः ॥"
इति राजनिर्घण्टः ॥

महापत्रा, स्त्री, ( महान्ति पत्राण्यस्याः । ) महाजम्बूः । इति रत्नमाला ॥ वृहत्पर्णयुक्ते त्रि ॥

महापथः, पुं, ( महांश्चासौ पन्थाश्चेति । "आन्महत इति ।" ६।३।४६ । इति महत आकारादेशः । "ऋक् पूरब्धूःपथामानक्षे ।" ५।४।७४ । इति समासान्तोऽकारः । ) प्रधानपथः । तत्पर्य्यायः । घण्टापथः २ संसरणम् ३ श्रीपथः ४ राजवर्त्म ५ उपनिष्क्रमणम् ६ उपनिष्करम् ७ । इति हेमचन्द्रः । ४ । ५३ ॥ ( यथा, रामायणे । २ । ८० । १६ ।
"पताका शोभिताः सर्व्वे सुनिर्म्मितमहापथाः ॥"
यथा च महाभारते । ५ । ६४ । २० ।
"संन्दृष्टसंसिक्तरजः प्रतिपेदे महापथम् ॥"
मृत्युपथः । "यात्रायां पथि निद्रायां महच्छब्दो न दीयते ।" इत्यस्य प्रतिप्रसूतार्थवत्त्वात् तथात्वम् । यथा, कथासरित्सागरे । २ । ४३ ।
"तच्छोकादिन्द्रदत्तस्य पिता यातो महापथम् ॥"
सुषुम्ना । यथा, हठयोगप्रदीपिकायाम् ।३।४।
"सुषुम्ना शून्यपदवी ब्रह्मरन्ध्रं महापथः ।
श्मशानं शाम्भवी मध्यमार्गश्चेत्येकवाचकाः ॥")

महापथगमः, पुं, (महापथस्य महापथे वा गमः गमनम् । ) मरणम् । इति जटाधरः ॥

महापद्मः, पुं, ( महत् पद्मं तादृशं चिह्नं शिरसि यस्य । ) अष्टनागान्तर्गतनागभेदः । तत्पर्य्यायः । अतिशुक्लः २ दशविन्दुकमस्तकः ३ । इति हेमचन्द्रः । ४ । ३७५ ॥ ( यथा, हरिवंशे । ३ । ११२ ।
"ऐरावतो महापद्मः कम्बलाश्वतरावुभौ ।"
दर्व्वीकरान्तर्गतसर्पविशेषः । तद् यथा । "कृष्णसर्पो महाकृष्णः कृष्णोदरः श्वेतकपोतो महाकोपोतो बलाहको महासर्पः शङ्खपालो लोहिताक्षो गवेधुकः परिसर्पः खण्डफणः ककुदः पद्मो महापद्मो दर्भपुष्पो दधिमुखः पुण्डरीको भ्रुकुटीमुखो विष्किरः पुष्पाभिकर्णो गिरिसर्प ऋजुसर्पः श्वेतोदरो महाशिरा अलगर्द्द आशीविष इति ॥" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥ ) कुवेरस्य नवनिध्यन्तर्गतनिधिविशेषः । इति जटाधरः ॥ ( यथा, मार्कण्डेये । ६४ । २५ ।
"यस्या वत्से ! प्रभावेण विद्यायास्तां शृणुष्व मे ।
पद्मिनी नाम विद्येयं महापद्माभिपूजिता ॥"
पुरभेदः । यथा, महाभारते ।१२।३५३।१।
"आसीत् किल नरश्रेष्ठ ! महापद्मे पुरोत्तमे ।
गङ्गाया दक्षिणे तीरे कश्चिद्विप्रः समाहितः ॥"
दैत्यभेदः । यथा, हरिवंशे । २३२ । ३ ।
"महापद्मो निकुम्भश्च पूर्णकुम्भश्च वीर्य्यवान् ॥"
हस्तिभेदः । यथा, महाभारते । ६ । ६१।५१ ।